# Importance of worshipping using Tulasi

# તુલસીપત્રપૂજામહિમા

## Document Information

Text title : Importance of worshipping using Tulasi

File name : tulasIpatrapUjAmahimA.itx

Category : devii, tulasI, devI, pUjA, bRihaddharmapurANam

Location : doc_devii

Description/comments : Brihaddharmapuranam | pUrvakhaNDaH | adhyAyaH 8| 1832||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

Importance of worshipping using Tulasi

# તુલસીપત્રપૂજામહિમા

તુલસ્યુવાચ ।
પુનસ્તુષ્ટાવ તુષ્ટાત્મા વચોભિરમલૈઃ સખિ ॥ ૧॥

ૐકારાય નમસ્તેઽસ્તુ શઙ્કરાય નમો નમઃ ।
શિવાય હરયે દક્ષબલિક્રતુહરાય તે ॥ ૨॥

એકત્રિપુરહન્ત્રે તે કૈટભાન્ધકઘાતિને ।
શ્રીગૌરીપતયે કૃષ્ણ મહાદેવ નમોઽસ્તુ તે ॥ ૩॥

ઇત્યાદિ સ્તુવતીં દેવીં તુલસીં શિવસન્નિધૌ ।
જગાદ વરદો દેવો દેવકીનન્દનો હરિઃ ॥ ૪॥

હરિરુવાચ ।
તુલસિ શ્રીમતિ શ્રેષ્ઠે વૃન્દે વૃન્દાવને પ્રિયે ।
સ્થિરીભવ મમ પ્રીત્યૈ યાવદાચન્દ્રતારકમ્ ॥ ૫॥

સદાભિનન્દ્યા વન્દ્યા ચ સુરાસુરનરોરગૈઃ ।
તવ પત્રમૃતે પૂજા નાદ્યારભ્ય ભવેન્મમ ॥ ૬॥

એકતઃ સર્વનૈવેદ્યનાનાપુષ્પવિભૂષણમ્ ।
એકતઃ પત્રમેકં તે દ્વાદશાક્ષરમન્ત્રવત્ ॥ ૭॥

ત્વાં યઃ પ્રદક્ષિણીકૃત્ય પ્રણમેત્ દણ્ડવત્ તરુમ્ ।
સસપ્તદ્વીપા પૃથિવી કૃતા તેન પ્રદક્ષિણા ॥ ૮॥

શ્રાદ્ધે ચ તર્પણે ચૈવ દાને નૈવેદ્યદાપને ।
ત્વત્પત્રેણ વિના ન સ્યાત્ તત્તત્કર્મફલોત્તરમ્ ।
પૂજિતે મયિ પત્રૈસ્તે તુષ્ટાઃ સ્યુઃ સર્વદેવતાઃ ॥ ૯॥

કાર્ત્તિકે માસિ તે પત્રમેકં યચ્છતિ યો જનઃ ।
સ ગોસહસ્રદાનસ્ય ફલમાપ્નોતિ માનવઃ ॥ ૧૦॥

માઘે માસિ ચ તે પત્રમાલાં યચ્છતિ યો જનઃ ।
તસ્મૈ અહં પ્રયચ્છામિ વાજિમેધક્રતોઃ ફલમ્ ॥ ૧૧॥

વૈશાખે માસિ તે પત્રૈર્યો મે શય્યાં પ્રયચ્છતિ ।
તસ્મૈ અહં પ્રયચ્છામિ સ્વમેવ કિમિતોઽધિકમ્ ॥ ૧૨॥

વૈશાખે માસિ તે પત્રજલેન યોઽભિષિઞ્ચતિ ।
તસ્મૈ અહં પ્રયચ્છામિ સદામૃતનિધિસ્થિતિમ્ ॥ ૧૩॥

આષાઢે માસિ યો મહ્યં ત્વત્પત્રરસવાસિતમ્ ।
જલં દદાતિ તસ્મૈ ચ દદામ્યપુનરુદ્ભવમ્ ॥ ૧૪॥

ત્વત્પત્રં યત્ર તત્રાપિ પતેત્ યત્ર મહીતલે ।
તદહં શિરસા ગ્રાહ્યં કરિષ્યામિ શિવાજ્ઞયા ॥ ૧૫॥

ત્વત્પત્રજલસિક્તાન્નં યો ભુઙ્ક્તે માનવઃ ક્વચિત્ ।
તદેવામૃતમિત્યુક્તં ભુક્તં ભાગ્યવતા શુભે ॥ ૧૬॥

ત્વત્પત્રરસભોજી યો ગઙ્ગાજલસમન્વિતમ્ ।
સોઽહમિત્યેવ વિજ્ઞેયં સત્યં સત્યં શપે શપે ॥ ૧૭॥

સ્પૃષ્ટ્વા યસ્તુલસીપત્રં મિથ્યા વદતિ શોભને ।
ન તસ્ય નરકાદુગ્રાદુદ્ધારઃ કલ્પકોટિષુ ॥ ૧૮॥

ત્વત્કાષ્ઠમાલાં ત્વત્કાષ્ઠધૃષ્ટપઙ્કઞ્ચ યોઽદધત્ ।
અહં તસ્યાનુગઃ શુદ્ધે ભવામિ સુતવત્પિતુઃ ॥ ૧૯॥

ઇતિ બૃહદ્ધર્મપુરાણાન્તર્ગતા નારાયણકૃતા તુલસીપત્રપૂજામહિમા સમ્પૂર્ણા ॥

॥ બૃહદ્ધર્મપુરાણમ્ । પૂર્વખણ્ડઃ । અધ્યાયઃ ૮। ૧૮-૩૨॥

The text follows tulasIkRita nArAyaNastutiH

*Importance of worshipping using Tulasi*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*